Chapter-2

# द्वितीय-परिच्छेदः

## (आलोच्यविषयस्योद्भवः विकासश्च)

i. व्याकृत्युद्भवकालः।

ii. विकासक्रमः।

(पृष्ठसंख्या-३७ तः ४५ पर्यन्तम्)

।। ॐ ।।

## द्वितीयपरिच्छेदः

### ।। व्याकृत्युद्भवकालः ।।

ब्रह्मण अद्यावधिपर्यन्तं यावन्तो विद्वांसोऽभूवन् ते समस्ता विद्वांस एकश्वरेणाभ्युपगच्छन्ति यन्निखिलेस्मिञ्जगति यज्ज्ञानम्प्रवृत्तञ्जातन्तत् सर्वम्वेदमूलकमेव। अत एव स्वयम्भूमनुनोक्तं सर्वज्ञानमय इति[1]। तस्माद् व्याकरणशास्त्रस्यापि आदिमूलं वेद एव। वैदिकमन्त्रेषु अनेकपदानां व्युत्पत्तयस्समुपलभ्यन्ते यथा—

[2]'यज्ञेन यज्ञमयजन्त देवाः'।। ऋ. – १/१६४/५०
[3]'ये सहांसि सहसा सहन्ते'।। ऋ. – ६/६६/९
[4]'पूर्वीरश्नन्तावश्विना'।। ऋ. – ८/५/३१
[5]'स्तोतृभ्यो महते मघम्' ।। ऋ. – १/११/३ ।।
[6]'धान्यमसिधिनुहि देवान्'।। यजु. – १/२०/ ।।
[7]'तदाप्नोदिन्द्रो यतीस्तस्मादायौ अनुष्ठन'।। अथर्ववेद – ३/१३/२

शब्दशास्त्रस्य प्रमाणीभूतेनाचार्यपतञ्जलिनाव्याकरणशास्त्राध्ययनस्य प्रयोजनस्य वर्णनसमये [8]चत्वारि श्रृङ्गा, [9]चत्वारि वाक्, [10]उत त्वः, सक्तुमिव[11], [12]सुदेवोऽसि इति पञ्च मन्त्राणि समुद्धृतानि सन्ति तेषामर्थमपि भगवता व्याकरणमूलकमकारि।

१. 'सर्वज्ञानमयो हि सः'। मनु. २/७ मेधातियेः टीका।
२. 'यतः कस्मात्? प्रख्यातं यजति कर्मेति नैरुक्ताः'। निरुक्त ३/१९।।
'यजयाचयतविच्छप्रच्छरक्षो नङ्' (अष्टा. ३/३/९०)
३. 'सह्धातोः असुन्'।
४. 'अश्विनौ यद् व्यश्नुवाते सर्वम्'। निरुक्तः १२/१।।
५. 'मघमिति धननामधेयम्, महतेदानकर्मणः'। निरुक्तः १/७।।
६. 'धिनोतेर्धान्यम्। महाभाष्यम्' ५/२/४।।
७. 'आप आप्नोतेः'। निरुक्त ९/२६, आप्नोतेर्ह्स्वश्च।।
८. ऋ. ४/५८/३।। ९. ऋ. १/१६४/४५।।
१०. ऋ. १०/७१/४।। ११. ऋ. १०/७१/२।।
१२. ऋ. ८/६९/१२।।

## ।। व्याकरणशास्त्रस्योत्पत्तिः ।।

व्याकृतिशास्त्रं कदा प्रादुर्बभूवास्य प्रश्नस्योत्तरः अत्यन्तं दुष्करः प्रतिभाति। अर्थात् योगजसन्निकर्षगम्य यत् उपलब्धानां वैदिकपाठानां रचनायाः पूर्वमेव व्याकरण-शास्त्रं परिपूर्णतां लेभे।

प्रकृतिप्रत्ययानां धातूपसर्गाणामथ च समासघटित-पूर्वोत्तर-पदानां विभजनं पूर्णतया निर्धारितमासीत्। वाल्मिकिरामायणेन सुविदितं भवति यत् भगवतः रामचन्द्रस्य राज्यकाले व्याकरणशास्त्रस्य सुव्यवस्थिताध्ययनाध्यापनमभवत्। भारतयुद्धस्य सम-कालिकयास्कस्य निरुक्तनामके ग्रन्थे अनेकेषां वैयाकरणानां निर्देशो परीदृश्यते। तथा च सर्वे शब्दा धातुजाः धातोरेव तेषां निष्पत्तिस्तद्बोधकशाकटायनव्याकरणमपि यास्कात् पूर्वमेव विनिरमायीति भाष्यकारपतञ्जलिमुनेर्वचनाऽनुसारमतिप्राचीनकालादेव व्याकरणशास्त्रस्य पठनपाठनं प्रारभत। युधिष्ठिरमीमांसकस्य आधारेण त्रेतायुगस्य आरम्भकाले व्याकरणशास्त्रं ग्रन्थरुपेण सुव्यवस्थितमभवत्।

## ।। व्याकरणशब्दस्य प्राचीनत्वम् ।।

शब्दशास्त्राय व्याकरणशब्दस्य प्रयोगः रामायणे[१], गोपयब्राह्मणे[२], मुण्डको-पनिषदि[३] तथा महाभारतादिषु[४] अनेकग्रन्थेषु समुपलभ्यते। एते सर्वे प्राचीनग्रन्थाः सन्ति।

१. 'रामायणकिष्किन्धा.' ३/२/९।।

२. 'गो.ब्रा.पू.' १/२४।।

३. 'मुण्डको.' १/५।।

४. सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते। तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा।। महाभा. उद्योग. ४२/६०।।

## षडङ्गशब्देन व्याकरणस्य निर्देशः —

शिक्षा, व्याकरणम्, निरुक्तः, छन्दः, कल्पः तथा ज्योतिषम् इति षट्संख्यकात्मनां वेदाङ्गानां षडङ्गशब्देन निर्देशः गोपथब्राह्मणे बौद्धायनादिधर्मशास्त्रे तथा रामायणादिषु प्रायः समुपलभ्यते। महामुनि पतञ्जलिरपि 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' एतद् आगमनवचनम् उद्धरति। सम्प्रति उपलभ्यमानब्राह्मणेभ्यः अतिप्राचीनो देवलः व्याकरणस्य षडङ्गेषु परिगणनामकरोत्।

## व्याकरणान्तर्गतानां कतिपयसंज्ञानां प्राचीनता —

एतत्प्रकारेण न केवलव्याकरणशास्त्रस्य प्राचीनत्वं सिद्धयति, अपि तु पाणिनीयतन्त्रे स्मृतानामनेकसंज्ञानामपि पूर्वत्वं प्रतीयते। तत्र केषाञ्चन संज्ञानामुल्लेखः गोपयब्राह्मणे लभ्यते। यथा—

'ओङ्कारं पृच्छामः, को धातुः किं प्रातिपदिकम, किं नामाख्यातम्, किं लिङ्गं, किं वचनं, का विभक्ति, को विकारः, को विकारी, कतिमात्रः, कतिवर्णः, कत्यक्षरः, कतिपदः, कः संयोगः........'।[1]

मैत्रायणीसंहितायां वैयाकरणप्रसिद्धविभक्तिसंज्ञायाः उल्लेखो लभ्यते[2]। ऐतरेयब्राह्मणे विभक्तिरुपेण सप्तधा विभक्तवाण्याः पाठो लभ्यते[3]।

व्याकरणशास्त्रस्य प्राचीनताविषये इत्येववक्तुं शक्यते यत् मूलवैदातिरिक्तं यत्किञ्चित् भारतीय-वैदिकवाङ्मयं सम्प्रति लभ्यते तत्र व्याकरणशास्त्रस्य उल्लेखो प्राप्यते। अतः एतद् सुव्यक्तं यत् वर्तमानकाले उपलब्धकृष्णद्वैपायनस्य शिष्यप्रशिष्यभिः प्रोक्तसकलार्षवैदिकवाङ्मयस्य रचनायाः पूर्वं व्याकरणशास्त्रं पूर्णतया सुव्यवस्थितम् अभवत्, तथा तस्य पठनपाठने व्यवहारः प्रारब्धो जातः।

---

१. गो. ब्रा. १/२४।।

२. तस्माद् षड् विभक्तयः। मैत्रा. सं. १/७/३।।

३. सप्तधा वै वागवदत्। ७१/७ ऐ.ब्रा.। तुलनां कुर्वन्तु यस्य ते सप्त सिन्धवः। ऋ. ८/६९/१२ सप्तसिन्धवः = सप्तसिन्धवः = सप्तविभक्तयः।

## व्याकृत्युद्भवकालः —

भारतीये ऐतिह्ये सर्वाषां विद्यानाम् आदिप्रवक्ता ब्रह्मा उच्यते। एतद् नितान्त-सत्यं वर्तते। तदनुसारं व्याकरणशास्त्रस्य प्रथमप्रवक्ता अपि ब्रह्मा वर्तते। ऋक्तन्त्रकारः लिखति – 'ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः'।।१/४।।

एतद्वचनानुसारेण व्याकरणस्य एकदेशस्य अक्षरसमाम्नायस्य सर्वप्रथमः प्रवक्ता ब्रह्मा वर्तते। युवानचांगः (ह्यूनसांग) अपि स्वभारतभ्रमणविवरणे ब्रह्मदेवकृद् व्याकरणं निर्दिशति[1]।

भारतीयैतिह्यानुसारं ब्रह्मा अस्य कल्पस्य विगतजल-प्लावनस्य पश्चाद् बभूव। यद्यपि उत्तरकाले एतन्नाम उपाधिरुपे अनेकव्यक्त्यर्थं प्रयुक्तं जातम्, तथाऽपि सर्वाषां विद्यानां आदिप्रवक्ता प्रथमब्रह्मा एव वर्तते, तथा निश्चप्रचम् एषः ऐतिहासिकव्यक्तिः वर्तते। अस्य कालः न्यूनातिन्यूनं १६ सहस्त्रवर्षपूर्वं वर्तते[2]।

१. ह्यूनचांग का भारतभ्रमण – वृत्तान्त, पृष्ठ १०९, पं. १४-१५।
इण्डियनप्रेस, प्रयाग, सन् १९२६।

२. व्या.शा.इ. युधिष्ठिरमीमांसकः पृ.६७ लाईन ४-८।।

# ॥ विकासक्रमः ॥

समस्तभारतीयैतिहासिकानां सुनिश्चितमतं वर्तते यत् लोके यावतां विद्यानां प्रकाशोऽभवत्, तासां विद्यानां प्रवचनं ब्रह्मा एव अकुरुत। प्रवचनमिदम् अतिविस्तृतमासीत्। एतत्प्रथमप्रवचनमेव शास्त्रं शासनं वेति नाम्ना प्रसिद्धमभूत्। उत्तरवर्तिसमस्तप्रवचनानि ब्रह्मण आदिप्रवचनानुसारं बभूव। तथा तान्यपि संक्षिप्तानि। अतः उत्तरवर्तिप्रवचनं मुख्यतया अनुशास्त्रम् अनुतन्त्रम् अथवा अनुशासनम्[1] इति शब्देन भण्येते।

पं. भगवतीदत्तः 'भारतवर्षस्य बृहद् इतिहासः' इति ग्रन्थस्य द्वितीयभागे (अ.४) ब्रह्माद्वारा प्रोक्तानां येषां २२ शास्त्राणां सप्रमाणम् उल्लेखमकुरुत तेषां नामानि इत्थम्—

१. वेदज्ञानम् २. ब्रह्मज्ञानम् ३. योगविद्या ४. आयुर्वेदः ५. हस्त्यायुर्वेदः ६. रसतन्त्रम् ७. धनुर्वेदः ८. पदार्थविज्ञानम् ९. धर्मशास्त्रम् १०. अर्थशास्त्रम् ११. कामशास्त्रम् १२. व्याकरणम् १३. लिपिज्ञानम् १४. ज्योतिषशास्त्रम् १५. गणितशास्त्रम् १६. वास्तुशास्त्रम् १७. शिल्पशास्त्रम् १८. अश्वशास्त्रम् १९. नाट्यवेदः २०. इतिहासः २१. पुराणम् २२. मीमांसाशास्त्रम् २३. शिवस्तवः वा स्तवशास्त्रम्।

वस्तुतः ब्रह्मणः प्रथमप्रवचनकालानन्तरं व्याकरणस्य क्रमिकः ह्रास एव जातः संक्षेपत्वात्, अनुशासनम् इत्यादौ 'अनु' शब्दः हीनार्थे वर्तते, इति विषये चर्चा कृता। अतः व्याकरणस्य विकासक्रमः न कदापि जातः, ह्रासक्रमः एव वर्तते। तथाऽपि लोके विकासक्रमस्य व्यवहारो भवति स च संस्करणादिना प्रचारप्रसारमाध्यमेन वा व्यवह्रीयते।

१. अनुशासनादिषु प्रयुक्तः 'अनु' निपातः अनुक्रमहीनार्थयोः द्योतकः वर्तते। उत्तरवर्तितन्त्राणां संक्षिप्तत्वाद् हीनत्वम्। यथा—अनुशाकटायनं वैयाकरणः 'अनु' शब्दः हीनार्थद्योतकः। द्रष्टव्यम्-'हीने' (१/४/८६) सूत्रस्यकाशिका।

**द्वितीयप्रवक्ता बृहस्पतिः —**

ऋक्तन्त्रस्य उपर्युक्तवचनानुसारं व्याकरणस्य द्वितीयप्रवक्ता बृहस्पतिः वर्तते। अङ्गिरापुत्रत्वात् एषः आङ्गिरस इति नाम्ना प्रसिद्धोऽभूत्। ब्राह्मणग्रन्थेषु देवानां पुरोहितो वर्णितः[१]। कोषग्रन्थेषु सुराचार्योऽपि पठितः। मत्स्यपुराणे १३/४७ एषः वाक्पतिः पदेन स्मृतः[२]।

देवगुरुः बृहस्पतिः अनेकशास्त्राणां प्रवचनमकरोत्। तत्र कतिपयशास्त्राणामुल्लेखः प्राचीनवाङ्मये उपलभ्यते ते चेत्थं वर्तते—

१. सामगानम् २. अर्थशास्त्रम् ३. इतिहासपुराणम् ४. तः ९. वेदाङ्गानि—महाभारते समस्तवेदाङ्गानां प्रवक्ता बृहस्पतिः निर्दिष्टः[३]।

**व्याकरणम् —**

वेदाङ्गेषु व्याकरणशास्त्रस्य प्रवचनस्य उल्लेखोऽनेकग्रन्थेषु उपलभ्यते। महाभाष्यानुसारं बृहस्पतिः शक्राय दिव्य (= सौर) सहस्रवर्षपर्यन्तं प्रतिपदव्याकरणम् उपदिदेश[४]। ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे पञ्चमाध्याये लिखितं यत्—

पप्रच्छ शब्दशास्त्रं च महेन्द्रश्च बृहस्पतिम्।
दिव्यं वर्षसहस्रं च स त्वा दध्यौ च पुष्करे ।।२७।।
तदा त्वत्तो वरं प्राप्य दिव्यं वर्षसहस्रकम्।
उवाच शब्दशास्त्रं च तदर्थं च सुरेश्वरम् ।।२८।।

**व्याकरणस्य आदिसंस्कर्ता इन्द्रः —**

पातञ्जलमहाभाष्येन ज्ञायते यत् बृहस्पतिः इन्द्राय प्रतिपदपाठेन शब्दोपदेशम् अकरोत्। तस्मिन् काले प्रकृति-प्रत्ययानां विभागो नाऽभवत्। प्रथमतः इन्द्रः

१. बृहस्पति वै देवानां पुरोहितः। ए.ब्रा. ८/२६
२. भार्यामर्पय वाक्पतेस्त्वम्।
३. वेदाङ्गानि बृहस्पतिः। शान्ति. अ. २१०, श्लो. २०।
४. 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच' (१/१/१)। एषः अर्थवादो वर्तते। अस्य तात्पर्यम् सुदीर्घकाले वर्तते।।

शब्दोपदेशस्य प्रतिपदपाठात्मिकायाः प्रक्रियायाः दुरुहतां ज्ञातवान्, तथा सः पदानां प्रकृतिप्रत्ययविभागद्वारा शब्दोपदेशक्रियायाः कल्पनामकरोत्। अस्य उल्लेखः तैत्तिरीय-संहिता ६/४/७ मध्ये उपलभ्यते।

वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति... तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्।

व्याकरणशास्त्रे मार्गद्वयं प्रसिद्धं वर्तते। एकः ऐन्द्रः अपरश्च माहेश्वरः शैवो वा। वर्तमानप्रसिद्ध्यनुसारं कातन्त्रव्याकरणम् ऐन्द्रसम्प्रदायस्य वर्तते, तथा पाणिनि-व्याकरणं शैवसम्प्रदायस्य। युधिष्ठिर मीमांसकस्य मतानुसारं पाणिनितः प्राचीनाः अष्टपञ्चाशीतिः व्याकरणप्रवक्तारः आसन्[1]।

अर्वाचीनग्रन्थकाराः प्रधानतया अष्टशाब्दिकानाम् उल्लेखं कुर्वन्ति[2]। हैमबृह-द्वृत्यवचूर्णिमध्ये तृतीयपृष्ठे निम्नोक्तानाम् अष्टव्याकरणानाम् उल्लेखो वर्तते—

ब्राह्ममैशानमैन्द्रं च प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टमम्।।

अत्र अष्ट व्याकरणानि परिगणितानि सन्ति – ब्राह्मम्, ऐशानम् (= शैवम्), ऐन्द्रम्, बार्हस्पत्यम्, त्वाष्ट्रम्, आपिशलं तथा पाणिनीयम्। रामायणस्य उत्तरकाण्डे नवव्याकरणानाम् उल्लेखो वर्तते[3]। श्रीतत्वविधिनामकवैष्णवग्रन्थे निम्नोक्तानां नवव्याकरणानां निर्देशो समुपलभ्यते—

ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्।।

रामायणे कानि नवव्याकरणानि आसन् तेषां निर्देशः न कुत्रापि। काशिकावृत्तौ (४/२/६०) पञ्चव्याकरणग्रन्थानामुल्लेखो वर्तते। तेषां नामसङ्कीर्तनं नास्ति।

१. सं. व्या. शा. इ. पृ. ७२ लाईन-६ तः २४ पर्यन्तम्।
२. व्याकरणमष्टप्रभेदम्। दुर्ग निरुक्तवृत्तिः। पृ. ७४।
३. सोऽयं नवव्याकरणार्थवेत्ता। किष्किन्धाकाण्ड (३/२९) मद्रास ला जर्नलप्रेस १९३३ संस्क.।

सम्भवतः एतानि एन्द्रम्, चान्द्रम्, पाणिनीयम्, काशकृत्स्नम्, आपिशलं भविष्यन्ति[१]।

**व्याकरणशास्त्रस्य त्रयो विभागाः —**

अद्यावधिपर्यन्तं यावन्ति व्याकरणानि जातानि, तानि त्रिषु विभागेषु विभजामहे। यथा—

१. छान्दसमात्रम् - प्रातिशाख्यादि।

२. लौकिकमात्रम् - कातन्त्रादि।

३. लौकिकवैदिकोभयविधम् - आपिशलपाणनीयादि।

अत्र लौकिकव्याकरणस्य यावन्तो ग्रन्थाः प्राप्यन्ते ते सर्वे पाणिनितः अर्वाचीनाः सन्ति।

**व्याकरणप्रवक्तॄणां विभागद्वयम् —**

अधुना अस्माभिः यावतां व्याकरणप्रवक्तॄणामाचार्याणां ज्ञानं लभ्यते तत् द्वयोः विभागयोः विभज्यामहे-१. पाणिनेः प्राचीनाः २. पाणिनेरर्वाचीनाः।

**पाणिनितः पूर्वाचार्याः —**

पाणिनिः स्वशब्दानुशासने आपिशलि—काश्यप-गार्ग्य—गालव-चाक्रवर्मण -भारद्वाज-शाकटायन-शाकल्य-सेनक-स्फोटायनादिदशशाब्दिकानामुल्लेखमकरोत्। एतदतिरिक्तं शिवः = महेश्वरः, बृहस्पतिः, इन्द्रः, वायुः, भरद्वाजः, भागुरिः, पौष्कर-सादिः, चारायणः, काशकृत्स्नः, शान्तनः, वैयाघ्रपद्यः, माध्यन्दिनि, रौढः, शौनकिः, गौतमः, व्याडि एते षोडशाचार्याः अन्यत्र उल्लेखिताः सन्ति।

**पाणिनेरर्वाचीनाचार्याः —**

पाणिनः अर्वाचीनैरनेकाचार्यैः व्याकरणसूत्राणि रचितानि। यत्र प्रधानाचार्याः निम्नोक्ताः सन्ति—

१. केचन जनाः पञ्चव्याकरणस्य अर्थं — सूत्रपाठः, धातुपाठः, गणपाठः, उणादिपाठः तथा लिङ्गानुशासनं ..........। अन्ये च पदच्छेद समास अनुवृत्ति वृत्ति तथा उदाहरणम्। यदि एषा कल्पना स्वीक्रियते चेत् 'पञ्चव्याकरणः' इति तेषां प्रयोगः साधु भवति।

| | | | |
|---|---|---|---|
| (१) | ........ | कातन्त्रम् | (२००० वि. पू.) |
| (२) | चन्द्रगोमी | चान्द्रम् | (१००० वि. पू.) |
| (३) | क्षपणकः | क्षपणकम् | (वि. प्रथम शताब्दी) |
| (४) | देवानन्दी(दिग्वस्त्र) | जैनेन्द्रम् | (सं. ५०० से पूर्व) |
| (५) | वामनः | विश्रान्तविद्याधरम् | (सं. ४००-६००) |
| (६) | पाल्यकीर्तिः | जैन शाकटायनम् | (सं. ८७१-९२४) |
| (७) | शिवस्वामी | – – | (सं. ९१४-९४०) |
| (८) | भोजदेवः | सरस्वतीकण्ठाभरणम् | (सं.१०७५-१११०) |
| (९) | बुद्धिसागरः | बुद्धिसागरम् | (सं.१०८०) |
| (१०) | भद्रेश्वरसूरिः | दीपक | (सं.१२०० से पूर्व) |
| (११) | वर्धमानः | ........ | (सं.११५०-१२२५) |
| (१२) | हेमचन्द्रः | हैमव्याकरणम् | (सं. ११४५-१२२९) |
| (१३) | मलयगिरिः | शब्दानुशासनम् | (सं. ११८८-१२५०) |
| (१४) | क्रमदीश्वरः | जोमर | (वि. १०० से पूर्व) |
| (१५) | अनुभूतिस्वरूपः | सारस्वतम् | (सं. १२५०) |
| (१६) | वोपदेवः | मुग्धबोध | (सं.१२८७-१३५०) |
| (१७) | पद्मनाभः | सुपद्म | (वि. १४ वीं शताब्दी) |
| (१८) | विनयसागरः | भोजव्याकरणम् | (वि.सं.१६५०-१७००) |

एतदतिरिक्ता अपि कतिपयार्वाचीनव्याकरणरचयितारः जाताः। येषां ग्रन्थः नाममात्रस्य व्याकरणं वर्तते अथवा अप्रसिद्धमस्ति। अतः तेषां वर्णनमत्र न कृतम्।

कालदेशशासकाणां प्रभावेण भिन्न-भिन्नकाले व्याकरणस्य ह्रासः विकासो वा जातः तत्र तत्तदाचार्यैः नूनतव्याकरणस्य टीकाग्रन्थाणां वा रचनां कृत्वा स्ववैदुष्यप्रभावेण व्याकरणशास्त्रस्य संस्कृतस्य च प्रचारो प्रसारो वा कृतः। एषा चर्चा कालस्थानसापेक्षा वर्तते। अस्माकं शोधप्रबन्धस्य प्रधानविवेचनविषयः भिन्नः वर्तते। अतः एषामाचार्याणां नाम्नां तत्कालस्य च केवलं वर्णनं विहितम्।